# शारदा संस्कृतम्

5

अखिल-ब्रह्माण्डे संस्कृतम्



# शारदा-संस्कृतम्

## भागः - 5
## ( कक्षा पञ्चमी )

सा विद्या या विमुक्तये
विद्या भारती

## लेखक मण्डल


**जगन्नाथ शर्मा**
अध्यक्ष - ग्रामीण शिक्षा विकास समिति, हरियाणा

**उपेन्द्र कुमार शास्त्री**
प्रधानाचार्य एवं शिक्षा प्रमुख, दिल्ली प्रान्त
उत्तर क्षेत्र संयोजक ( संस्कृत )

**प्रवीण सिंह**
प्रान्त संयोजक ( संस्कृत )
हिमाचल शिक्षा समिति


## संपादक मण्डल


**नारायण सिंह** - प्रान्त संयोजक ( संस्कृत ), हरियाणा
**नरेन्द्र पाल** - प्रान्त संयोजक ( संस्कृत ), दिल्ली
**तिरिवीधि साम्ब शिवराव** - आचार्य, स० ध० स० बा० मन्दिर पंजाबी बाग, दिल्ली



द्वितीय संस्करण - 2020

# विद्या भारती उत्तर क्षेत्र

नारायण भवन, गीता निकेतन परिसर, कुरुक्षेत्र -136118
दूरभाष : 01744-259941 E-mail : vbukkkr@yahoo.co.in

मूल्यम् ₹ 55/-

# प्राक्कथनम्

संसारस्य प्राचीनतमा, श्रेष्ठा, वैज्ञानिकी च भाषा संस्कृतम् अनेकासां भाषाणां जननी अस्ति। सङ्गणकस्य कृते सर्वाधिका उपयुक्ता भाषा नूनमेव संस्कृतम्। आधुनिके युगे भविष्यस्य नवमसन्ततेः सङ्गणकस्य (9th generation computer) उत्पादनं संस्कृताधारेण एव भविष्यति। अत एव वयं वक्तुं शक्नुमः यत् एषा भाषा न केवलं प्राचीनतमा भाषा अपितु आधुनिकी भाषापि अस्ति। उच्यते हि सम्प्रति यत् **'संस्कृतं पठ, आधुनिको भव।'**

एकस्याः आख्यायाः अनुसारेण संस्कृतस्य प्रत्यक्षः अप्रत्यक्षश्च प्रभावः अखिलविश्वस्य प्रायः 97% भाषाणामुपरि वर्तते। उपर्युक्तकथनेन स्पष्टमेव यत् एषा भाषा सार्वदैशिकी भाषा। पुनः एषा भाषा जनभाषा भवतु, एतस्य कृते मिलित्वा प्रयत्नं कुर्मो वयम्।

बुद्धेः विकासाय संस्कृतमावश्यकम्। विद्या भारती एतां भाषाम् आधारभूतविषयरूपेण मानयति। अस्माकं विद्यालये द्वितीया-कक्षातः संस्कृतस्य अध्यापनं प्रारभ्यते। अस्य कृते बहुभ्यः दिनेभ्यः प्रयासः प्रचलति स्म यत् उत्तरक्षेत्रस्य संस्कृतस्यापि स्वपुस्तकं भवेत्। चिरकालादुत्पन्नविचारः गतवर्षमेव सफलः अभवत्। सम्प्रति पूर्णतया संशोधितं द्वितीयं संस्करणं भवतः सुधीजनस्य हस्ते अस्ति ।

कस्याः अपि भाषायाः चत्वारि कौशलानि वर्तन्ते - श्रवणम्, भाषणम्, पठनं लेखनञ्च। अतः चतुर्णां कौशलानां विकासाय अस्माकं सर्वं कार्यं भवेत्। कक्षायां बहुविध-शिक्षणोपकरणानां सहायतया अध्यापनं भवेत्। कक्षासु प्रत्यक्षविधिना, विभिन्नवस्तूनां प्रदर्शनमाध्यमेन, स्फोरक-पत्राणाम् उपयोगं कृत्वा, प्रश्नोत्तर-माध्यमेन, वार्तालापैः, सम्भाषणमाध्यमेन निरन्तरम् अध्यापनं भवेत्, येन छात्राः संस्कृतसम्भाषणे दक्षाः भवेयुः। आचार्यः प्रत्येकं पाठस्य 'पॉवर पॉइंट' प्रदर्शनस्य (PPT) स्तरानुसारं सम्यक् निर्माणं कृत्वा अध्यापनं कुर्यात् ।

समये समये संस्कृतवस्तु-प्रदर्शनी, सज्जपट्टे संस्कृतलेख-प्रदर्शनम्, कक्षाकार्यप्रदर्शनाय समुचिता व्यवस्था, भित्तिलेखः, संस्कृतगीतगायनम्, श्लोकगायनम्, सुभाषितलेखन-प्रतियोगिता, संस्कृतसुलेख-प्रतियोगिता, सम्भाषण-प्रतियोगिता, गीतापाठ-प्रतियोगिता, प्रश्नमञ्च-प्रतियोगिता चादयः स्वव्यवस्थानुसारम् अवश्यमेव कारयेत्। विद्यालये संस्कृतमय-वातावरणस्य निर्माणार्थं संस्कृताचार्यैः सदैव प्रयत्नो विधेयः।

बहुविधप्रयासेन संस्कृतं संस्कृतमाध्यमेन अध्यापनार्थं सम्भाषणाधारेण सरलभाषया च प्रस्तुतमिदं पुस्तकं भवतः सम्मुखम् अस्ति। संस्कृत-पुस्तकस्य कृते उत्तर-क्षेत्रस्य एषः प्रयासः अस्ति। अत एव त्रुटेः सम्भावना तु वर्तते एव। भवादृशान् सुधीजनान् निवेदयामः यत् आगामि-संस्करणस्य कृते प्रस्तुतपुस्तक-विषयकस्वविचारान् प्रेषयन्तु भवन्तः। भवतः सुधीजनस्य विचारः नूनमेव आगामिसंस्करणस्य कृते उपयोगी भविष्यति।

संस्कृतं सर्वत्र, संस्कृतं सर्वेषां कृते, संस्कृतं कण्ठे कण्ठे, संस्कृतं निरन्तरम्, संस्कृतं मुखे मुखे च भवतु इति मनसि निधाय संस्कृताध्ययनं भवेत्।

**शृणुत संस्कृतम् ! वदत संस्कृतम् !! पठत संस्कृतम् !!! लिखत संस्कृतम् !!!!**

**लसतु च संस्कृतं गृहे गृहे च पुनरपि।**

**जयतु संस्कृतम्। जयतु भारतम्**

**विदुषां पदकिङ्करः**
**उपेन्द्र-कुमार-शास्त्री**
**उत्तरक्षेत्र-संस्कृत-संयोजकः**

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | सङ्कल्पः | 04 |
| | | आगच्छ स्मरामः | 05 |
| 01. | प्रथमः पाठः | मम विद्यालयः | 06 |
| 02. | द्वितीयः पाठः | अहो विस्मरणशीलता | 9 |
| 03. | तृतीयः पाठः | वस्तु-प्रदर्शिनी | 12 |
| 04. | चतुर्थः पाठः | नैव क्लिष्टा न च कठिना | 15 |
| 05. | पञ्चमः पाठः | वीरबालकौ लवकुशौ | 17 |
| 06. | षष्ठः पाठः | कुतः/कः/का/किम् | 21 |
| 07. | सप्तमः पाठः | अस्माकं देशः | 24 |
| 08. | अष्टमः पाठः | देशाभिमानिनी वृद्धा | 26 |
| 09. | नवमः पाठः | सुभाषितानि | 29 |
| 10. | दशमः पाठः | सङ्घे शक्तिः | 31 |
| 11. | एकादशः पाठः | कल्पना चावला | 33 |
| 12. | द्वादशः पाठः | संस्कृतं सर्वत्र | 35 |
| | | परिशिष्टम् | 37 |
| | | विद्यालयस्य विभिन्न-कार्यक्रमाणां कृते उपयोगार्थम् | 46 |
| | | अध्यापकाय लक्ष्यगीतम् | 47 |
| | | संस्कृत भाषा के कुछ महत्त्वपूर्ण तथ्य | 48 |

# सङ्कल्पः



पठामि संस्कृतं नित्यं, वदामि संस्कृतं सदा ।
ध्यायामि संस्कृतं सम्यक्, वन्दे संस्कृतमातरम् ॥1॥

संस्कृतस्य प्रसाराय, नैजं सर्वं ददाम्यहम् ।
संस्कृतस्य सदा भक्तो, वन्दे संस्कृत-मातरम् ॥2॥

संस्कृतस्य कृते जीवन्, संस्कृतस्य कृते यजन् ।
आत्मानम् आहुतं मन्ये, वन्दे संस्कृत-मातरम् ॥3॥

**शब्दार्थाः**

**ध्यायामि** - ध्यान करता हूँ, **सम्यक्** - अच्छी प्रकार से, **नैजम्** - अपना, **आहुतं** - समर्पित।

# आगच्छ स्मरामः



विद्यालये योगः भवति।
योगाचार्यः छात्रान् योगं शिक्षयति।
योगेन चित्तं शुद्धं भवति।
छात्राः योगाय योगकक्षं गच्छन्ति।

जलम् एव जीवनम्।
बालकः जलं पिबति।
बालिका जलेन पादपं सिञ्चति।
शिवभक्ताः गङ्गाजलाय हरिद्वारं गच्छन्ति।
जल-संरक्षणम् अस्माकं परमं कर्तव्यम् अस्ति।







एषा धरा मम माता अस्ति।
धरासंरक्षणं वृक्षारोपणेन भवति।
धरा-रक्षणाय 'प्लास्टिक-थर्माकोल-प्रयोगं न करोमि।
पर्यावरण-संरक्षेणन जीवनं सफलं भवति।

जीवने स्वच्छता आवश्यकी।
वयं प्रतिदिनं गृहं विद्यालयं च स्वच्छं कुर्मः।
कनिष्कः प्रोञ्छनेन कक्षं स्वच्छं करोति।
सर्वे सुस्वास्थ्याय स्व-स्व-कक्षं स्वच्छं कुर्वन्ति।



# मम विद्यालयः




अहम् अमृतसरे वसामि। अत्र अहं सरस्वती-शिशुमन्दिरे पठामि। अहं पञ्चम्यां कक्षायां पठामि। मम विद्यालयः नगरात् बहिः अस्ति।

मम विद्यालयस्य भवनम् अतीव सुन्दरम् अस्ति। विद्यालयस्य परिसरः विशालः अस्ति। विद्यालयं परितः वृक्षाः सन्ति। विद्यालये रमणीयम् उद्यानम् अस्ति। उद्याने मनोहराणि पुष्पाणि विकसन्ति। तत्र अनेकाः लताः अपि सन्ति। लतासु विविधानि पुष्पाणि विकसन्ति। अत्र पक्षिणां कलरवः सर्वेषां मनांसि आकर्षयति। अस्य मुख्यद्वारे सरस्वत्याः प्रतिमास्ति। मम विद्यालयस्य प्रधानाचार्यः अनुशासनप्रियः कुशलः प्रशासकः च अस्ति। विद्यालये सप्ततिः योग्याः आचार्याः सन्ति। सर्वे आचार्याः मृदुभाषया छात्रान् पाठयन्ति।

सर्वे छात्राः आचार्याणाम् आदरं कुर्वन्ति। मम विद्यालये अष्टादश-शताधिकाः छात्राः विद्याध्ययनं कुर्वन्ति। अत्र विद्याध्ययनेन सह छात्राः संस्कारान् अपि प्राप्नुवन्ति। भोजनकाले सर्वे छात्राः पङ्क्तिबद्धाः उपविश्य भोजन-मन्त्रोपरान्तं भोजनं कुर्वन्ति।

मम विद्यालये एकः विशालः पुस्तकालयः अस्ति। अत्र छात्राः पुस्तकानि, समाचारपत्राणि च पठन्ति। अत्र एका विज्ञान-प्रयोगशाला अपि अस्ति। छात्राः प्रयोगशालां गत्वा विविधान् प्रयोगान् कुर्वन्ति। विद्यालये एकः संस्कृत-प्रकोष्ठः अपि अस्ति। तत्र गत्वा वयं संस्कृतं पठामः। विद्यालये एकः सङ्गणक-कक्षः अस्ति। छात्राः अत्र सङ्गणक-शिक्षां प्राप्नुवन्ति। सायङ्काले शारीरिक-वेलायां सर्वे छात्राः योगाभ्यासं, व्यायामं च कुर्वन्ति। मम विद्यालये अवकाशात् पूर्वं राष्ट्रगीतं (वन्देमातरम्) अपि भवति। मम विद्यालयः नगरे श्रेष्ठतमः विद्यालयः अस्ति।

## शब्दार्थाः

**अत्र** – यहाँ, **बहिः** – बाहर, **प्रतिमा** – मूर्ति, **सरस्वत्याः** – सरस्वती की, **विंशतिः** – बीस, **निपुणेन** – कुशलता से, **अष्टादशशताधिकाः** – अठारह सौ से अधिक, **प्राप्नुवन्ति** – प्राप्त करते हैं, **परितः** – चारों ओर, **रमणीयम्** – सुन्दर, **उद्यानम्** – बगीचा, **लतासु** – लताओं में, **मनांसि** – मन को, **उपविश्य** – बैठकर, **समाचारपत्राणि** – समाचारपत्र, **सङ्गणक-कक्षः** – कम्प्यूटर कक्ष, **सप्ततिः** – सत्तर, **प्रकोष्ठः** – कमरा।

## अभ्यासः

**1. एतेषां प्रश्नानाम् उत्तराणि लिखतु –**

क) त्वं कुत्र पठसि?

ख) त्वं कस्यां कक्षायां पठसि?

ग) विद्यालये कति छात्राः पठन्ति?

घ) विद्यालये कति आचार्याः सन्ति?

ङ) छात्राः कुत्र गत्वा विविधान् प्रयोगान् कुर्वन्ति?

च) सर्वे छात्राः शारीरिकवेलायां किं कुर्वन्ति?

छ) अवकाशात् पूर्वं विद्यालये किं भवति ?

**2. उदाहरणानुसारं सन्धिं कृत्वा उत्तरपुस्तिकायां लिखतु –**

| | | | | | |
|---|---|---|---|---|---|
| यथा – विद्या + आलयः | = | विद्यालयः | अत्र + अहम् | = | ........................ |
| प्रतिमा + अस्ति | = | ........................ | पुस्तक + आलयः | = | ........................ |
| संस्कृत + आचार्यः | = | ........................ | विद्या + अध्ययनम् | = | ........................ |
| मन्त्र + उपरान्तम् | = | ........................ | योग + अभ्यासः | = | ........................ |

**3. अधोलिखित-क्रियापदानां लकारं, पुरुषं वचनं च लिखतु –**

| | क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा – | कुर्वन्ति | लट् | प्रथमः पुरुषः | बहुवचनम् |
| | पठामि | .................... | .................... | .................... |
| | आकर्षयति | .................... | .................... | .................... |
| | भवति | .................... | .................... | .................... |

**4. अधोलिखित-पदानां विभक्तिं वचनं च लिखतु –**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – | मन्दिरे | सप्तमी | एकवचनम् |
| | नगरात् | .................... | .................... |
| | सरस्वत्याः | .................... | .................... |
| | छात्रान् | .................... | .................... |
| | आचार्याणाम् | .................... | .................... |
| | लतासु | .................... | .................... |
| | पुस्तकानि | .................... | .................... |

5. **कोष्ठकात् उचितैः पदैः रिक्तस्थानानि पूरयतु –**

क) मम .................................. भवनम् अतीव सुन्दरम् अस्ति। (विद्यालयः, विद्यालयस्य)

ख) सर्वे छात्राः .................................. आदरं कुर्वन्ति। (आचार्याणां, आचार्ये)

ग) विद्यालयं परितः .................................. सन्ति। (वृक्षः, वृक्षाः)

घ) तत्र अनेकाः .................................. अपि सन्ति। (लताः, लते)

ङ) पुस्तकालये छात्राः .................................. पठन्ति। (पुस्तकानि, पुस्तकाय)

च) सायङ्काले शारीरिक– .................................. सर्वे छात्राः योगाभ्यासं कुर्वन्ति। (वेलायाः, वेलायां)

6. **एतेषां पदानां वर्ण-विन्यासं करोतु –**

**यथा** – वसामि = व् + अ + स् + आ + म् + इ

विद्यालयः = ..... + ..... + ..... + ..... + ..... + ..... + ..... + ..... + .....

नगरात् = ..... + ..... + ..... + ..... + ..... + ..... + .....

पाठयन्ति = ..... + ..... + ..... + ..... + ..... + ..... + ..... + ..... + .....

उद्यानम् = ..... + ..... + ..... + ..... + ..... + ..... + .....

आकर्षयति = ..... + ..... + ..... + ..... + ..... + ..... + ..... + ..... + ..... + .....

व्यायामम् = ..... + ..... + ..... + ..... + ..... + ..... + ..... + ..... + .....

7. **मम विद्यालयस्य विषये संस्कृतेन पञ्चवाक्यानि लिखतु –**

..................................................................................................... ।

..................................................................................................... ।

..................................................................................................... ।

..................................................................................................... ।

..................................................................................................... ।

**अन्ये विषये (यथा** – मम आचार्यः, मम गृहम्, मम ग्रामः, मम दिनचर्या इत्यादयः) अपि पञ्च-पञ्च वाक्यानि संस्कृतेन लिखतु।

8. **विद्यालयस्य विषयाचार्याणां सूचीं (संस्कृतेन) संस्कृत-कक्षे स्थापयतु।**

**आचार्याय**

प्रस्तुत पाठ के आधार पर उपर्युक्त विषय पर पाँच-पाँच संस्कृत वाक्यों की रचना करने में छात्रों की सहायता करें।

# अहो विस्मरणशीलता





माधवः – राघव! गृहे कोऽपि नास्ति किम्?

राघवः – अहम् एकः एव अस्मि । पिता मित्रेण सह वाचनालयं गतवान्। माता सीतया सह मन्दिरं गतवती। भगिनी रेखया सह आपणं गतवती।

माधवः – गणपतिः कुत्र?

राघव : – सः अनिलेन सह इदानीमेव गतवान् ।

माधवः – तस्य पादरक्षा तु अत्रैव अस्ति खलु ।

राघवः – त्वरा कारणतः सः पादरक्षया विना एव गतवान्।

माधवः – मादृशः एव सः। अम्बा 'वस्तूनि आनयतु' इति उक्तवती। किन्तु अहं स्यूतेन विना आगतवान्।

राघवः – धनेन विना तु न आगतवान् खलु?

माधवः – धनम् ..........! तिष्ठतु पश्यामि। अहो! धनेन विना न आगतवान्। "भवान् अपि मया सह विपणिम् आगच्छतु।"

राघवः – अहं सिद्धः अस्मि। चलतु।

माधवः – अरे! युतकेन विना एव आगच्छसि किम्? युतकं धारय।

राघवः – अहमपि भवादृशः एव। सर्वे विस्मरणशीलाः।

## शब्दार्थाः

**खलु** – निश्चय ही, **भगिनी** – बहिन, **इदानीमेव** – इस समय ही (अभी), **अत्रैव** – यहीं, **त्वरा** – जल्दी, **तिष्ठतु**– ठहरो, **धारय** – धारण करो, **विस्मरणशीलाः** – भूल जाने की आदत वाले, **सह** – साथ, **आपणम्** – दुकान, **पादरक्षा** – चप्पल, **मादृशः** – मेरी तरह, **भवादृशः** – आपकी तरह, **स्यूतः** – थैला, **विपणिम्** – बाजार, **युतकम्** – कुर्ता।

## अभ्यासः

**1. पाठ्य-पुस्तकाधारेण एकपदेन उत्तरं लिखतु –**

क) पिता केन सह वाचनालयं गतवान्? .........
ख) माता कया सह मन्दिरं गतवती? ..........................
ग) गणपतिः केन सह गतवान्? ...................
घ) गणपतिः कया विना एव गतवान्? ......................
ङ) अम्बा किम् उक्तवती? .........................
च) "अहं सिद्धः अस्मि" इति कः अवदत्? ..............
छ) माधवः केन विना आगतवान्? ..............
ज) युतकेन विना कः आगच्छति ? .........................

**2. उदाहरणानुसारं रेखाङ्कितपदं विलोक्य प्रश्ननिर्माणं करोतु –**

**यथा** – मीनः <u>जलेन</u> विना न जीवति। **प्रश्न.** मीनः केन विना न जीवति?

क) मनोजः <u>पादेन</u> खञ्जः अस्ति। ........................................................?
ख) युतकेन विना <u>माधवः</u> आगच्छति। ........................................................?
ग) माता <u>भगिन्या</u> सह मन्दिरं गतवती। ........................................................?
घ) भ्राता अनुजया सह <u>विद्यालयं</u> गतवान्। ........................................................?
ङ) <u>भगिनी</u> रेखया सह आपणं गतवती। ........................................................?

**3. भिन्न-प्राकृतिकं पदं चित्वा अग्रे रिक्तस्थाने लिखतु –**

| | | | | | | |
|---|---|---|---|---|---|---|
| क) | पत्रम् | पुष्पम् | फलम् | तोयम् | शाखा | ................................ |
| ख) | चर्मकारः | सुवर्णकारः | कुम्भकारः | सज्जाकारः | कथाकारः | ................................ |
| ग) | केशाः | नेत्रम् | मुखम् | कण्ठः | दण्डः | ................................ |
| घ) | चालकः | शिक्षकः | लेखकः | श्रमिकः | भल्लूकः | ................................ |
| ङ) | अश्वः | वानरः | गजः | धेनुः | शुकः | ................................ |

**4. उदाहरणानुसारम् अधोलिखितानां रञ्जित-पदानां 'सह' उपयोगेन वाक्यानि रचयतु –**

**यथा** – रामः **रावणः** युद्धं कृतवान्। रामः **रावणेन सह** युद्धं कृतवान्।

क) सीता **रामः** वनं गतवती। ........................................................।
ख) कृष्णः **राधा** नृत्यं कृतवान्। ........................................................।
ग) भरतः **सिंहः** क्रीडां कृतवान्। ........................................................।
घ) सुशीलः **मित्रं** सम्भाषणं कृतवान्। ........................................................।
ङ) माता **भगिनी** मन्दिरं गतवती। ........................................................।

च) भ्राता **अनुजा** विद्यालयं गतवान् ............................................................।
छ) अजय: **फलम्** दुग्धं पीतवान् ............................................................।

**5. उदाहरणानुसारम् अधोलिखित-कोष्ठकस्य आधारेण तृतीया-विभक्तिं कृत्वा विद्यालयस्य 'छात्र: केन सह कुत्र गच्छति?' इति लिखतु –**

| | | | | | |
|---|---|---|---|---|---|
| **यथा** – | मनोज: मित्रम् – | मित्रगृहम् | | | मनोज: मित्रेण सह मित्रगृहं गच्छति। |
| क) | राकेश: भगिनी – | मातुलगृहम् | | | ............................................................। |
| ख) | गजेन्द्र: अग्रज: – | आश्रमं | | | ............................................................। |
| ग) | महेश: कर्मकर: – | क्षेत्रं | गच्छति | | ............................................................। |
| घ) | परिकर: सेविका – | ग्रामं | | | ............................................................। |
| ङ) | प्रणव: आचार्या – | वाचनालयं | | | ............................................................। |
| च) | शेखर: राघव: – | विपणिं | | | ............................................................। |

**6. कोष्ठकस्य आधारेण उदाहरणानुसारं वाक्यानि रचयतु –**

| | | | | |
|---|---|---|---|---|
| मीन: | जलं | | | चलति |
| वाहनम् | इन्धनं | | | गच्छन्ति |
| जना: | सूर्यं | | | जीवति |
| मानव: | धनं | विना | न | गच्छति |
| सैनिका: | पादरक्षां | | | जीवन्ति |

**यथा** – मीन: जलं विना न जीवति।
क) ............................................................।
ख) ............................................................।
ग) ............................................................।
घ) ............................................................।

**7. उदाहरणवाक्यानुसारं वाक्यानि रचयतु –**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1. | अध्यक्ष: | – सभा | 2. | पुत्र: | – गृहस्थ: | 3. | गृहिणी | – गृहम् |
| 4. | लवणम् | – पाक: | 5. | सम्भाषणम् | – संस्कृतज्ञ: | 6. | लज्जा | – बालिका |
| 7. | दूरभाष: | – कार्यालय: | 8. | विद्या | – पुरुष: | 9. | व्यवस्था | – गृहम् |
| 10. | तिलकम् | – मुखम् | 11. | राष्ट्रभक्त: | – देश: | 12. | सेवाभाव: | – सज्जन: |

**यथा** – अध्यक्षेण विना सभा न शोभते ।
क) ............................................ न शोभते।
ख) ............................................ न शोभते।
ग) ............................................ न शोभते।
घ) ............................................ न शोभते।
ङ) ............................................ न शोभते।
च) ............................................ न शोभते।
छ) ............................................ न शोभते।
(ज) ............................................ न शोभते।
झ) ............................................ न शोभते।
(ञ) ............................................ न शोभते।
ट) ............................................ न शोभते।

**आचार्याय**

तृतीया विभक्ति युक्त वाक्यों द्वारा भैया/बहिनों को आपस में सम्भाषण करना सिखाएँ ।